# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**- आचार्य (SEM-3) | **प्रश्नपत्रम्** - ४ | **गुणाः** - ७० |
| **विषयः** - रामानुजवेदान्तः | **कोड - CC- 5.3.9.** | **समयः** - १० तः १ |
| **दिनाङ्कः** - ०७/१२/२०१८ | **सन्दर्भग्रन्थः**- तत्त्वमुक्ताकलापः | |

**॥ प्रथमान्वितिः ॥**

**प्र-१ पद्यमेकं यथाग्रन्थं व्याख्यात ।** ०५

१. आवापोद्वापत्तः स्युः कति कति कविधीचित्रवत्
तत्तदर्थष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।
तत्त्वलोकस्तु लोप्तुं प्रभवति सहसा निस्मस्तान् समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्रणिता स्थाणुतादिः ॥

२. स्वच्छन्देनागमनेन प्रकृतिमहृदङ्ककारमात्रक्षसिद्धिः
नाध्यक्षेणाप्रतीतेः न पुनरनुमेया व्याप्तिलिङ्गाद्यसिद्धेः ।
सत्त्वाद्युन्मेषभ्निान्महत इह तथा स्यादहङ्कारभेदः
प्राच्यादक्षाणि मात्राः प्रजनपति परां मध्यमस्तूभयार्थः ॥

**प्र-२ एक एव साध्यः ।** १०

१. पञ्चीकरणप्रक्रियां यथाग्रन्थं उपपादयत । २. मङ्गलं पद्यं विवेचयत ।

**॥ द्वितीयान्वितिः ॥**

**प्र-३ एकस्य सिद्धान्तानुगुणं संसाध्यः ।** ०५

१. कार्यं नैवारभेरन् समधिकमणवः सर्वतस्संप्रयुक्ताः
दिक्संयोगैकदेश्यन् न घटत इह ते दिककृतोप्यंशभेदः ।
बुद्धेस्त्वशानपेक्षा स्फुरति विषयिता विश्रमस्त्वस्तु दृष्टे
नोचेत् आरम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः

२. इत्थं वृत्त्यादिखेदो न भवति, न च नः कल्पनागौरवं
स्यात् वस्त्रे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या ।
देशाधिक्यं समेतेष्वणुषु, न हि ततः स्थूलधीबाधशङ्काः
संसर्गादेर्विशेषादवयर्विपरिषप्राशिवन्यादिवादः ॥

**प्र-४ एकस्य समाधानं कुरुत ।** १०

१. उपादानोपादेयवादं स्पष्टयत । २.क्षणिकवादं निरूप्य निरसत ।

**॥ तृतीयान्वितिः ॥**

**प्र-५ एकः साध्यः ।** ०५

१. सत्वेऽसत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं हेतुप्राप्तिर्न पञ्चाद्भवितुः अघटितोत्पादनेऽतिप्रसङ्गः ।
जन्यं जन्मान्यथा वा द्वयमसत् अनवस्थानकार्य क्षतिभ्याम् इत्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेविरोधात् ॥

२. कदाचित् कस्य कालावधिनियतिकरं पूर्वसत् कारणं स्यात् भावोपष्टम्भशून्यो न खलु तदवधिं प्रागभावोऽपि कुर्यात्।
कार्यं निर्हेतुकं चेत् कथमिव न भवेत् नित्यता तुच्छता वा कदाचित्कस्वभावाद्यपि न नियमेनादन्यथाऽतिप्रसङ्गात्॥

**प्र-६ एकस्य व्याख्यानं कुरुत।** **१०**

१. ज्ञानेन्द्रियाणि निरूपणीयानि। २. अन्तःकरणं स्पष्टयत।

**॥ चतुर्थान्वितिः ॥**

**प्र-७ एकस्य यथानुगुणं व्याख्यानं कुरुत।** **०५**

१. शब्दं गृह्णाति दूराभ्युदितमपि बहिस्सन्तता श्रोत्रवृत्तिः
दिग्भेदासन्तादिग्रहणमपि तथा तत्र तत्सन्निधानात्।
इत्येकेऽन्ये तु दूरान्तिकगतजनताशब्दधीकालभेदात्
श्रोत्रायातस्य तस्य ग्रहमनुमितिमप्याहुरस्मिन् दिगादेः॥

२. शब्दस्याधारभूतं कथमपि गगनं शक्यते नानुमातुं
स्वेच्छातः पारिशेष्यक्रम इह कथितोऽतिप्रसङ्गादि दुस्थः।
निष्क्रान्त्यादेर्न तद्धीः सति नभसि यतो नास्ति कुड्यादिकेऽसौ
रोधस्त्वावारकैश्चेत् तदभवनवशात् निष्क्रमादिश्च सिध्येत्।

**प्र-८ एकस्य समाधानं कुरुत।** **१०**

१. वेङ्कटनाथाचार्यस्य जीवनं परिचाययत।

**२.** तत्त्वमुक्ताकलापस्य जडद्रव्यसरस्य सारः लेख्यः।

**प्र-८ दशप्रश्नानां लघूत्तराणि यच्छत।** **१०**

१. तत्त्वमुक्ताकलापस्य कर्ता कः ?
२. तत्त्वमुक्ताकलापे कति सराः?
३. जडद्रव्यसरे कति श्लोकाः?
४. जडद्रव्यसरे प्रतिपाद्यः विषयः कः ?
५. इन्द्रियाणि एकसङ्ख्यकानि उत अनेकानि?
६. परमाणुकारणवादः केषां मतम्?
७. किं तत्त्वत्रयम्?
८. तत्त्वमुक्ताकलापः कं सिद्धान्तम् अनुसरति?
९. विशिष्टाद्वैतस्य प्रवर्तकः कः ?
१०. शब्दविवर्तवादः कस्य?
११. पटस्य उपादानकारणं किम्?
१२. क्षणिकवादः कस्य सिद्धान्तः?
१३. शब्दः कस्य गुणः?
१४. तेजसः गुणः कः ?
१५. कालोऽस्मि इति कः वदति?